विशाखान्तं रविचारेण वर्षति” इत्युक्तेस्तस्या दृष्टिसूचकत्वम्। तत्काले हि भूमेरन्तर्गतरजोयोग इत्यतस्तस्यास्तथात्वम्। यथोक्तम् “रजोयुक्त्वाम्बुवाची च रौद्राद्यपादगे रवौ” ज्योति०। मिथुनराशिर्हि मृगशिरःशेषार्द्धार्द्रापादचतुष्क पुनर्वसुपादत्रयात्मकः। तत्र मृगशिरसि भुक्ते यदा आर्द्रायाः प्रथमपादोपभोगार्थं रविर्गच्छति तदा पृथ्वी ऋतुमती भवति तच्च मिथुने ६।४० चत्वारिंशत्कलाधिकषडंशानतीत्य आर्द्राद्यपादावधि यावत्तिष्ठति तावत्। यथोक्तं राजमा०। “रवौ रौद्राद्यपादस्थे भूमेः संजायते रजः” इत्युपक्रम्य। “चत्वारिंशल्लिप्तिक षड्भागयुतोरविर्यदा भवति। तत्राम्बुवाची ज्ञेया शिवर्क्षपादे स्थितो यावत्। दिग्भागम्भून्य लिप्तोगणितेन भवति रविर्यदा साम्न” इति। तत्र च वर्ज्यानि “न स्वाध्यायं वषट्कारं न देवपितृतर्पणम्॥ हलानां वाहनञ्चैव वीजानां वपनं तथा” राजमा०। “तस्यां पाठोवीजवापोनाहिभीर्दुग्धपानतः” ज्यो०। यदा दृर्क्षं समादाय भानोर्मन्मथगामिता। पुनस्तत्स्थेनमादाय यजनं त्रिदिनं त्यजेत्। काम्यं नैमित्तिकं चैव यात्रां मन्त्रक्रियां तथा। ऋतुमत्यां न कुर्व्वीत पूर्व्वसङ्कल्पिताहते। न कुर्य्यात् खननं भूमेः सूच्यग्रेणापि शङ्करि!। मत्स्य सू०। “यतिनोव्रतिनश्चैव विधवा च द्विजस्तथा। अम्बुवाचीदिने चैव पाकं कृत्वा न भक्षयेत्। स्वपाकं परपाकं वा अम्बुवाचीदिने तथा। भक्षणं नैव कर्त्तव्यं चण्डालान्नमयं स्मृतम्” विष्णुरहस्यम्।

**अम्बुवासिन्** त्रि० अम्बुप्रधाने देशे वसति वस–णिनि ङीप्। १ पाटलावृक्षे। २ जलवासिमात्रे त्रि०। [पाटलावृक्षे।

**अम्बुवासी** स्त्री अम्बुप्रधाने देशे वासो यस्याः गौरा०ङीष्।

**अम्बुवाह** पु० अम्बूनि वहति वह–अण् उप० स०। १ जलधरे मेघे। “व्याजेन यस्याबहिरम्बुवाहः यत्रोज्झिताभिर्मुक्तैरम्बुवाहैः” “हलधरपरिधानश्यामलैरम्बुवाहैः” इति च माघः। २मुस्तके। शिव अम्बुवाड्भयत्र।

**अम्बुवाहिन्** त्रि० अम्बूनि वहति धारयति वह–णिनि ६त०। १ जलधारके त्रि० २ मेघे ३ मुस्ते च पु०।

**अम्बुवाहिनी** स्त्री अम्बूनि वहति स्थानान्तरं नयति वह–णिनि ६त० ङीप्। १नौकाजलसेचनार्थे काष्ठनिर्म्मिते पात्रभेदे २ जलवाहिकायां स्त्रियाञ्च।

**अम्बुविहार** पु०७त०। जलक्रीडायाम् सन्तरणादौ “वपुरम्बुविहारहिमं शुचिना” माघः। [बृहूदकायां घृतकुमार्य्याम्।

**अम्बुविस्रवा** स्त्री अम्बूनि विस्रवति वि+स्रु–अच्। पत्रान्त-

**अम्बुवेतस** पु० अम्बुजातोवेतसः शाक०त०। जलवेतसे।

**अम्बुशिरीषिका** स्त्री अल्पः शिरीषः अल्पार्थे कन् स्त्रीत्वम् जलशिरीषे। [(जोंक) इति ख्यातायां जलौकायाम्।

**अम्बुसर्पिणी** स्त्री अम्बुनि सर्पति सृप–णिनि ७त०।

**अम्बुसेचनी** स्त्री अम्बूनि सिच्यन्ते नौकातः अनया सिच–करणे ल्युट् ६त० ङीप्। नौकादेर्जलसेचनीपात्रे।

**अम्बूकृत** न० अनम्बु अम्बु कृतं अम्बु श्लेष्मात्मकाम्बु उपचारात्तद्युक्तं ततः च्वि+कृ–क्त। निष्ठीवनयुक्ते वचसि।

**अम्ब्** पु० अबि–शब्दे क्त नि० न इट्। १अम्लरसे २तद्वति त्रि०।

**अम्भ** ध्वनौ भ्वा० आ० अक० सेट्। अम्भते आम्भिष्ट आनम्भे आनभे अयमु इदित्येके तेन आनम्भे इत्येव। अम्भः

**अम्भस्** न० आप्यते आप–असुन् “उदके नुम्भौ चेति” उणा० अम्भ–शब्दे असुन् वा। १जले “सेव्यमानमज्वरं प्राज्ञः कोऽम्भसा परिषिञ्चति”?। “त्रिस्रोतसः सन्ततधारमम्भः” इति च माघः। “परिश्रमाम्भःपुलकेन सर्पता” किरा०। “कथमप्यम्भसामन्तरा निष्पत्तेः प्रतीक्षते” कुमा० “अभ्यर्णेऽम्भःपतनसमये” इति मेघ०। २देवे, जलहेतुत्वात् तथात्वम् ३ पितृलोके, तेषां जलमयचन्द्रलोके स्थितत्वात् अम्मयदेहत्वाच्च तत्त्वम्। ४मनुष्ये “वेत्थ सौम्य! यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति” छा०उ०उक्तेः। पुरुषाणां जलमयत्वात् तथात्वं पञ्चाग्निविद्यापर्व्वे प्रपञ्चः। ५असुरे, युद्धे देवसङ्घैया शब्दायमानत्वात्तथा। “तानि ह वा एतानि चत्वार्य्यम्भांसि देवा मनुष्याः पितरोऽसुरा” इति श्रुतिः। ६बालनामौषधौ। ज्योतिषोक्ते ७लग्नाच्चतुर्थस्थाने। योगशास्त्रोक्तासु नवविधतुष्टिषु मध्ये प्रकृत्याख्यायां ८आध्यात्मिकतुष्टौ च। यथा “आध्यात्मिक्यश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः। वाह्या विषयोपरमात् पञ्च, नव तुष्टयोऽभिमताः सा०का०। “प्रकृतिव्यतिरिक्तआत्मास्तीति प्रतिपद्य ततोऽस्य श्रवणमननादिना विवेकसाक्षात्काराय त्वसदुपदेशतुष्टो यो न प्रयतते तस्य चतस्र आध्यात्मिक्यस्तुष्टयोभवन्ति प्रकृतिव्यतिरिक्तात्मानमधिकृत्य यस्मात्तास्तुष्टयस्तस्मादाध्यात्मिक्यः, कास्ताः, इत्यत आह प्रकृत्युपादानकालभाग्याख्याः प्रकृत्यादिराख्या यासां तास्तथोक्ताः। तत्र प्रकृत्याख्या तुष्टिर्यथा कस्यचिदुपदेशः “विवेकसाक्षात्कारोहि प्रकृतिपरिणामभेदः तञ्च प्रकृतिरेव करोतीति कृतं ते ध्यानाभ्यासेन, तस्मादेवमेवास्व वत्सेति”। सेयमुपदेष्टव्यस्य शिष्यस्य प्रकृतौ तुष्टिः प्रकृत्याख्या तुष्टिः अम्भ इत्युच्यते” त०कौ०। अस्य अम्भः-